# Nagaih Krita Kedareshamaheshvara Stuti

# નાગૈઃ કૃતા કેદારેશમહેશ્વરસ્તુતિઃ

## Document Information

Text title : Nagaih Krita Kedareshamaheshvara Stuti

File name : nAgaiHkRRitAkedAreshamaheshvarastutiH.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhImAkhyaH aShTamAMshaH | adhyAyaH 26 shivaprasAdaH | 4-15||

Latest update : July 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 5, 2024

*sanskritdocuments.org*

# નાગૈઃ કૃતા કેદારેશમહેશ્વરસ્તુતિઃ

(શિવરહસ્યાન્તર્ગતે ભીમાખ્યે)

નાગા ઊચુઃ ।

પાહ્યબ્જમિત્રનયનામલભૂતિગાત્ર
રુદ્ર ત્રિણેત્ર ગિરિરાજસુતાકલત્ર ।
પાત્રં વિચિત્રતરમેતદહો પવિત્ર-
સત્રાતિરાત્રમખતર્પિત લોકયાશુ ॥ ૪॥

શ્રીવ્યોમકેશ સકલેશ મહેશ શમ્ભો
કોશાવકાશ શશિશેખર શઙ્કરેશ ।
દેવેશ ખણ્ડપરશો પશુપાશનાશ
પાહીશ મામકધિયા તવ પાદભક્તાન્ ॥ ૫॥

તં ભર્ગસર્ગકરણાવ્યય દીનવર્ગં
સન્તારયાર્ગલપદાન્પરિમોચયાશુ ।
દૂર્વાદલાર્ચિતપદ ત્રિદશારિગર્વ-
નિર્વાપણાર્ણવવસામ્બુજનેત્રપૂજ્ય ॥ ૬॥

શ્રીમન્મેરુશરાસન ત્રિભુવનાધ્યક્ષાધ્વરાધ્યક્ષ નો
વીક્ષસ્વાદ્ય દયાકટાક્ષલહરીસંહારિતાપાદિકાન્ ।
ઉક્ષાધીશ્વરકેતનેશ્વર દયાપાત્ર ત્રિણેત્રાધુના
કક્ષાણાં ચ પતે સુદક્ષમખહૃત્ તૂર્ણં પ્રસાદં કુરુ ॥ ૭॥

ભૂભૃદ્રાજકુમારિકાકુચતટીપાટીરપઙ્કાઙ્કિતં
રુદ્રાક્ષપ્રિય ભસ્મયુક્ત નિટિલજ્વાલોરુ ગઙ્ગાધર ।
વૈયાઘ્રત્વગલઙ્કૃતાઙ્ગમસકૃત્પશ્યેમ ચિત્તે સદા
વિશ્વેશાદિપદપ્રદં હરિશરં સમ્ભાવયામો હર ॥ ૮॥

- -

સ્કન્દ ઉવાચ ।

નાગાનાં ચ સ્તવં શ્રુત્વા કેદારેશો મહેશ્વરઃ ।
તલ્લિઙ્ગમધ્યાચ્ચ તદા હ્યાવિરાસીત્સ્વયં હરઃ ॥ ૯॥

નાગાજિનોત્તરાસઙ્ગઃ શશાઙ્કકૃતશેખરઃ ।
ઉમયા સહિતો દેવો નીલકણ્ઠસ્ત્રિલોચનઃ ॥ ૧૦॥

ગઙ્ગાધરઃ કપાલાઙ્કશૂલજ્વલનસત્કરઃ ।
તં દૃષ્ટ્વા દેવદેવેશં સર્પાઃ કદ્રૂસમન્વિતાઃ ॥ ૧૧॥

પ્રણમ્ય ચ મહાદેવં સંસ્તુવન્નીલલોહિતમ્ ॥ ૧૨॥

- -
નાગાઃ ઉચુઃ
વેદાર્વ શર્વ યમગર્વહરાવ શર્વ-
કન્દર્પદર્પહર સર્પમહોરુહાર ।
અગ્ન્યગ્ર ભીમ ભવ ભર્ગ સુસર્ગવર્ગ-
સ્વર્ગાપવર્ગદ વિભો તવ ભક્તિમાર્ગમ્ ॥ ૧૩॥

દૂર્વાદલાર્ચનકૃતાં ભવદીયલિઙ્ગે
સઙ્ગેઽપિ શાઙ્ગનિવહાઃ કિમુતાપમાર્ગૈઃ ।
બિલ્વૈશ્ચ પઙ્કજવરૈઃ કનકૈઃ કદમ્બૈઃ
પૂજ્યેન્દુચૂડ કુલભૂધરવાસ શમ્ભો ॥ ૧૪॥

વિશ્વાધિકેશ્વર મહેશ્વર રામધીર
ગૌરીમનોહર હરાત્યય મારમાર ।
સંસારભારપરિહારભવ પ્રસીદ
શ્રીશઙ્કરાવ વરધુર્યધર પ્રસીદ ॥ ૧૫॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે નાગૈઃ કૃતા કેદારેશમહેશ્વરસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભીમાખ્યઃ અષ્ટમાંશઃ । અધ્યાયઃ ૨૬ શિવપ્રસાદઃ । ૪-૧૫॥

- .. shrIshivarahasyam . bhImAkhyaH aShTamAMshaH . adhyAyaH 26 shivaprasAdaH . 4-15..

Notes:
Skanda સ્કન્દ narrates the scene where Nāga-s નાગાઃ pray to Śiva શિવ, while He makes an appearance to them and their mother Kadrū કદ્રૂ.

Proofread by Ruma Dewan

*Nagaih Krita Kedareshamaheshvara Stuti*

pdf was typeset on July 5, 2024

Please send corrections to *sanskrit@cheerful.com*